Sri Sathya Sai Sadhana Trust,
Publications Division, Prasanthi Nilayam

# CHAMAKAM

*2nd Anuvaka*

ज्यैष्ठ्यं च म आधिपत्यं च मे

jyaiṣṭhyaṁ ca ma ādhipatyaṁ ca me

मन्युश्च मे भामश्च मे

manyuśca me bhāmaśca me

अमश्च मेऽम्भश्च मे

amaśca me'ambhaśca me

जेमा च मे महिमा च मे

jemā ca me mahimā ca me

वरिमा च मे प्रथिमा च मे

varimā ca me prathimā ca me

वर्ष्मा च मे द्राघुया च मे

varṣmā ca me drāghuyā ca me

वृद्धं च मे वृद्धिश्च मे

vṛddhaṁ ca me vṛddhiśca me

सत्यं च मे श्रद्धा च मे

satyaṁ ca me śraddhā ca me

जगच्च मे धनं च मे

jagacca me dhanaṁ ca me

वशश्च मे त्विषिश्च मे

vaśaśca me tviṣiśca me

क्रीडा च मे मोदश्च मे

krīḍā ca me modaśca me

जातं च मे जनिष्यमाणं च मे

jātaṁ ca me janiṣyamāṇaṁ ca me

सूक्तं च मे सुकृतं च मे

sūktaṁ ca me sukṛtaṁ ca me

वित्तं च मे वेद्यं च मे

vittaṁ ca me vedyaṁ ca me

भूतं च मे भविष्यच्च मे

bhūtaṁ ca me bhaviṣyacca me

सुगं च मे सुपथं च म

sugaṁ ca me supathaṁ ca ma

ऋद्धं च म ऋद्धिश्च मे

ṛddhaṁ ca ma ṛddhiśca me

क्लृप्तं च मे क्लृप्तिश्च मे

kḷptaṁ ca me kḷptiśca me

मतिश्च मे सुमतिश्च मे ॥२॥

matiśca me sumatiśca me||2||